Amritanilayam Stotras

4.7 - ??????????? ???????? ???????? - ????? ???????? ????????? ?????? ????

कृष्ण यजुर्वेदीय तैत्तिरीय संहिताया -
ञ्चतुर्थकाण्डे सप्तमः प्रश्नः –
वसोर्धारादिशिष्ट संस्काराभिधानं

ओ -न्नमः परमात्मने , श्री महागणपतये नमः ,
श्री गुरुभ्यो नमः । ह॒रि॒ः ओम् ॥

अग्ना॑विष्णू स॒जोष॑से॒मा व॑र्धन्तु वा॒ -
ङ्गिर॑ः । ध्यु॒नैर्वाजे॑भि॒रा ग॑तम् ॥ वाज॑श्च
मे प्रस॒वश्च॑ मे॒ प्रय॑तिश्च मे॒ प्रसि॑तिश्च मे
धी॒तिश्च॑ मे॒ क्रतु॑श्च मे॒ स्वर॑श्च मे॒
श्लोक॑श्च मे श्रा॒वश्च॑ मे॒ श्रुति॑श्च मे॒
ज्योति॑श्च मे॒ सुव॑श्च मे प्रा॒णश्च॑ मे ऽपा॒न - [
प्रा॒णश्च॑ मे ऽपा॒नः , च॒ मे॒ व्या॒नश्च॒ मे
ऽसु॑श्च मे] 1

-श्च॑ मे व्या॒नश्च॒ मे ऽसु॑श्च मे चि॒त्त -ञ्च॑ म॒
आधी॑त -ञ्च मे॒ वाक्च॑ मे॒ मन॑श्च मे॒ चक्षु॑श्च
मे॒ श्रोत्र॑ -ञ्च मे॒ दक्ष॑श्च मे॒ बल॑ -ञ्च म॒
ओज॑श्च मे॒ सह॑श्च म॒ आयु॑श्च मे ज॒रा च॑ म आ॒त्मा
च॑ मे त॒नूश्च॑ मे॒ शर्म॑ च मे॒ वर्म॑ च॒ मे
ऽङ्गा॑नि च मे॒ ऽस्थानि॑ च मे॒ परू॑ग्ँषि च मे॒
शरी॑राणि च मे ॥ 2 ॥
(अ॒पा॒न – स्त॒नूश्च॑ मे॒ – ऽष्टाद॑श च) (अ . 1)

ज्यैष्ठ्य॑ -ञ्च म॒ आधि॑पत्य -ञ्च मे म॒न्युश्च॑
मे॒ भाम॑श्च॒ मे -ऽम॑श्च॒ मे ऽभ॑श्च मे जे॒मा च॑ मे
महि॒मा च॑ मे वरि॒मा च॑ मे प्रथि॒मा च॑ मे व॒र् ष्मा
च॑ मे द्राघु॒या च॑ मे वृ॒द्ध -ञ्च॑ मे॒ वृद्धि॑श्च
मे स॒त्य -ञ्च॑ मे श्र॒द्धा च॑ मे॒ जग॑च्च [ ] 3

-मे॒ धन॑ -ञ्च मे॒ वश॑श्च मे॒ त्विषि॑श्च मे
क्री॒डा च॑ मे॒ मोद॑श्च मे जा॒त -ञ्च॑ मे
जनि॒ष्यमा॑ण -ञ्च मे सू॒क्त -ञ्च॑ मे सुकृ॒त -ञ्च॑ मे

वि॒त्त -ञ्च॑ मे॒ वेद्य॑ -ञ्च मे भू॒तञ्च॑ मे
भवि॒ष्यच्च॑ मे सु॒ग -ञ्च॑ मे सु॒पथ॑ -ञ्च म ऋ॒द्ध -
ञ्च॑ म॒ ऋद्धि॑ श्च मे कॢ॒प्त -ञ्च॑ मे॒ कॢप्ति॑श्च
मे म॒तिश्च॑ मे सुम॒तिश्च॑ मे ॥ 4 ॥
(जग॒च्च – र्धि॒ – श्चतु॑र्दश च) (अ. 2)

श -ञ्च॑ मे॒ मय॑श्च मे प्रि॒य -ञ्च॑ मे ऽनुका॒मश्च॑
मे॒ काम॑श्च मे सौमन॒सश्च॑ मे भ॒द्र -ञ्च॑ मे॒
श्रेय॑श्च मे॒ वस्य॑श्च मे॒ यश॑श्च मे॒ भग॑श्च
मे॒ द्रवि॑ण -ञ्च मे य॒न्ता च॑ मे ध॒र्ता च॑
मे॒क्षेम॑श्च मे॒ धृति॑श्च मे॒ विश्व॑ -ञ्च [ ] 5

मे॒ मह॑श्च मे सं॒ विँच्च॑ मे॒ ज्ञात्र॑ -ञ्च मे॒
सूश्च॑ मे प्र॒सूश्च॑ मे॒ सीर॑ -ञ्च मे ल॒यश्च॑ म
ऋ॒त -ञ्च॑ मे॒ ऽमृत॑ -ञ्च मे -ऽय॒क्ष्म -ञ्च॒ मे
ऽना॑मयच्च मे जी॒वातु॑श्च मे दीर्घायु॒त्व -ञ्च॑
मे ऽनमि॒त्र -ञ्च॒ मे ऽभ॑य -ञ्च मे सु॒ग -ञ्च॑ मे॒
शय॑न -ञ्च मे सू॒षा च॑ मे सु॒दिन॑ -ञ्च मे ॥ 6 ॥
(विश्व॑ -ञ्च॒ – शय॑न – म॒ष्टौ च॑) (अ. 3)

ऊर्क्च॑ मे सू॒नृता॑ च मे॒ पय॑श्च मे॒ रस॑श्च मे
घृ॒त -ञ्च॑ मे॒ मधु॑ च मे॒ सग्धि॑श्च मे॒ सपी॑तिश्च
मे कृ॒षिश्च॑ मे॒ वृष्टि॑श्च मे॒ जैत्र॑ -ञ्च म॒
औद्भि॑द्य -ञ्च मे र॒यिश्च॑ मे॒ राय॑श्च मे पु॒ष्ट -
ञ्च॑ मे॒ पुष्टि॑श्च मे वि॒भु च॑ [वि॒भु च॑, मे॒
प्र॒भु च॑ मे] 7

मे प्र॒भु च॑ मे ब॒हु च॑ मे॒ भूय॑श्च मे पू॒र्ण -
ञ्च॑ मे पू॒र्णत॑र -ञ्च॒ मे ऽक्षि॑तिश्च मे॒
कूय॑वाश्च॒ मे -ऽन्न॑ -ञ्च॒ मे ऽक्षु॑च्च मे
व्री॒हय॑श्च मे॒ यवा᳚श्च मे॒ माषा᳚श्च मे॒
तिला᳚श्च मे मु॒द्गाश्च॑ मे ख॒ल्वा᳚श्च मे
गो॒धूमा᳚श्च मे म॒सुरा᳚ - -श्च मे प्रि॒यङ्ग॑वश्च॒
मे ऽण॑वश्च मे श्या॒माका᳚श्च मे नी॒वारा᳚श्च मे ॥
8 ॥
(वि॒भु च॑ – म॒सुरा॒ – श्चतु॑र्दश च) (अ. 4)

अश्मा॑ च मे॒ मृत्ति॑का च मे गि॒रय॑श्च मे॒
पर्व॑ताश्च मे॒ सिक॑ताश्च मे॒ वन॒स्पत॑यश्च मे॒
हिर॑ण्य -ञ्च॒ मे ऽय॑श्च मे॒ सीस॑ -ञ्च मे॒
त्रपु॑श्च मे श्या॒म -ञ्च॑ मे लो॒ह -ञ्च॑ मे॒ -
ऽग्निश्च॑ म॒ आप॑श्च मेवी॒रुध॑श्च म॒ ओष॑धयश्च मे

कृष्टप॒च्य -ञ्चं॑ [कृष्टप॒च्य -ञ्चं॑ , मे॒
ऽकृ॒ष्टप॒च्य -ञ्चं॑ मे] 9

मे ऽकृष्टप॒च्य -ञ्चं॑ मे ग्र॒मा॒याश्च॑ मे प॒शव॑
आर॒ण्याश्च॑ य॒ज्ञेन॑ कल्पन्तां॑ वि॒त्तं॑ -ञ्चं॑
मे॒ वित्ति॑श्च मे भू॒त -ञ्चं॑ मे॒ भूति॑श्च मे॒
वसु॑ च मे वस॒तिश्च॑ मे॒ कर्म॑ च मे॒ शक्ति॑श्च॒ मे
-ऽर्थ॑श्च म॒ एम॑श्च म॒ इति॑श्च मे॒ गति॑श्च मे ॥ 10
(कृ॒ष्टप॒च्य -ञ्चा॒ – ऽष्टाच॑त्वारिग्ं॑शच्च)
(अ . 5)

अ॒ग्निश्च॑ म॒ इन्द्र॑श्च मे॒ सोम॑श्च म॒
इन्द्र॑श्च मे सवि॒ता च॑ म॒ इन्द्र॑श्च मे॒
सर॑स्वती च म॒ इन्द्र॑श्च मे पू॒षा च॑ म॒
इन्द्र॑श्च मे॒ बृह॒स्पति॑श्च म॒ इन्द्र॑श्च मे
मि॒त्रश्च॑ म॒ इन्द्र॑श्च मे॒ वरु॑णश्च म॒
इन्द्र॑श्च मे॒ त्वष्टा॑ च – [ ] 11

म॒ इन्द्र॑श्च मे धा॒ता च॑ म॒ इन्द्र॑श्च मे॒
विष्णु॑श्च म॒ इन्द्र॑श्च मे॒ ऽश्विनौ॑ च म॒
इन्द्र॑श्च मे म॒रुत॑श्च म॒ इन्द्र॑श्च मे॒
विश्वे॑ च मे दे॒वा इन्द्र॑श्च मे पृथि॒वी च॑ म॒
इन्द्र॑श्च मे॒ -ऽन्तरि॑क्ष -ञ्च म॒ इन्द्र॑श्च
मे॒ द्यौश्च॑ म॒ इन्द्र॑श्च मे॒ दिश॑श्च म॒
इन्द्र॑श्च मे मू॒र्धा च॑ म॒ इन्द्र॑श्च मे
प्र॒जाप॑तिश्च म॒ इन्द्र॑श्च मे ॥ 12 ॥
(त्वष्टा॑ च॒ – द्यौश्च॑ म॒ – एक॑विग्ं॒शतिश्च) (अ . 6)

अ॒ग्ं॒शुश्च॑ मे र॒श्मिश्च॒ मे ऽदा॑भ्यश्च॒ मे -
ऽधि॑पतिश्च म उपा॒ग्ं॒शुश्च॑ मे ऽन्तर्या॒मश्च॑
म ऐन्द्रवा॒यवश्च॑ मे मैत्रावरु॒णश्च॑ म
आश्वि॒नश्च॑ मे प्रतिप्र॒स्थान॑श्च मे
शु॒क्रश्च॑ मे म॒न्थी च॑ म आग्रय॒णश्च॑ मे
वैश्वदे॒वश्च॑ मे ध्रु॒वश्च॑ मे वैश्वान॒रश्च॑ म
ऋतुग्र॒हाश्च॑ [ऋतुग्र॒हाश्च॑ , मे॒
ऽति॒ग्रा॒ह्या॑श्च म] 13

मे ऽतिग्रा॒ह्या॑श्च म ऐन्द्रा॒ग्नश्च॑ मे
वैश्वदे॒वश्च॑ मे मरुत्व॒तीया॑श्च मे
माहे॒न्द्रश्च॑ म आदि॒त्यश्च॑ मे सावि॒त्रश्च॑
मे सारस्व॒तश्च॑ मे पौ॒ष्णश्च॑ मे पात्नीव॒तश्च॑

मे हारियोज॒नश्च॑ मे ॥ 14 ॥
(ऋ॒तु॒ग्र॒हाश्च॒ – चतु॑स्त्रिग्ं॒शच्च) (अ **. 7)**

इ॒द्‌ध्मश्च॑ मे ब॒र्‌हिश्च॑ मे॒ वेदि॑श्च मे॒
धिष्णि॑याश्च मे॒ स्रुच॑श्च मे चम॒साश्च॑ मे॒
ग्रावा॑णश्च मे॒ स्वर॑वश्च म उपर॒वाश्च॑ मे
ऽधि॒षव॑णे च मे द्रोणकल॒शश्च॑ मे वाय॒व्या॑नि च
मे पूत॒भृच्च॑ म आधव॒नीय॑श्च म॒ आग्नी ᳚द्ध्र -ञ्च
मे हवि॒र्धान॑ -ञ्च मे गृ॒हाश्च॑ मे॒ सद॑श्च मे
पुरो॒डाशा ᳚श्च मे पच॒ताश्च॑ मे -ऽवभृ॒थश्च॑ मे
स्वगाका॒रश्च॑ मे ॥ 15 ॥
(गृ॒हाश्च॒ – षोड॑श च **) (**अ **. 8)**

अ॒ग्निश्च॑ मे घ॒र्मश्च॑ मे॒ -ऽर्कश्च॑ मे॒
सूर्य॑श्च मे प्रा॒णश्च॑ मे ऽश्वमे॒धश्च॑ मे
पृथि॒वी च॒ मे ऽदि॑तिश्च मे॒ दिति॑श्च मे॒
द्यौश्च॑ मे॒ शक्व॑रीर॒ङ्गुल॑यो॒ दिश॑श्च मे
य॒ज्ञेन॑ कल्पन्ता॒ - मृक्च॑ मे॒ साम॑ च मे॒
स्तोम॑श्च मे॒ यजु॑श्च मे दी॒क्षा च॑ मे॒ तप॑श्च म
ऋ॒तुश्च॑ मे व्र॒त -ञ्च॑ मे ऽहोरा॒त्रयो ᳚
वृ॒ष्ट्या बृ॑हद्रथन्त॒रे च॑ मे य॒ज्ञेन॑
कल्पेताम् ॥ 16 ॥
(दी॒क्षा -ऽ – ष्टाद॑श च **) (**अ **. 9)**

गर्भा ᳚श्च मे व॒थ्साश्च॑ मे॒ त्र्यवि॑श्च मे
त्र्य॒वी च॑ मे दित्य॒वाट् च॑ मे दित्यौ॒ही च॑ मे॒
पञ्चा॑विश्च मे पञ्चा॒वी च॑ मे त्रिव॒थ्सश्च॑ मे
त्रिव॒थ्सा च॑ मे तुर्य॒वाट् च॑ मे तुर्यौ॒ही च॑
मे पष्ठ॒वाच्च॑ मे पष्ठौ॒ही च॑ म उ॒क्षा च॑ मे व॒शा
च॑ म ऋष॒भश्च॑ - [व॒शा च॑ म ऋष॒भश्च॑ , मे॒ वे॒हच्च॑ मे
] 17

मे वे॒हच्च॑ मे ऽन॒ड्वान् च॑ मे धे॒नुश्च॑ म॒
आयु॑र्य॒ज्ञेन॑ कल्पता -म्प्रा॒णो य॒ज्ञेन॑
कल्पता -मपा॒नो य॒ज्ञेन॑ कल्पतां -व्या॒ँनो
य॒ज्ञेन॑ कल्पता॒ -ञ्चक्षु॑ -र्य॒ज्ञेन॑
कल्पता॒ग्॒ श्रोत्र॑ -य॒ँज्ञेन॑ कल्पता॒ -म्मनो॑
य॒ज्ञेन॑ कल्पता॒ं वा॒ँग् य॒ज्ञेन॑ कल्पता -
मा॒त्मा य॒ज्ञेन॑ कल्पतां -य॒ँज्ञो य॒ज्ञेन॑
कल्पताम् ॥ 18 ॥
(ऋ॒ष॒भश्च॑ – चत्वारि॒ग्ं॒शच्च॑) (अ **. 10)**

एका॑ च मे ति॒स्रश्च॑ मे॒ पञ्च॑ च मे स॒प्त च॑ मे॒
नव॑ च म॒ एका॑दश च मे॒ त्रयो॑दश च मे॒ पञ्च॑दश च मे
स॒प्तद॑श च मे॒ नव॑दश च म॒ एक॑विग्ंशतिश्च मे॒
त्रयो॑विग्ंशतिश्च मे॒ पञ्च॑विग्ंशतिश्च मे
स॒प्तविग्ं॑शतिश्च मे॒ नव॑विग्ंशतिश्च म॒
एक॑त्रिग्ंशच्च मे॒ त्रय॑स्त्रिग्ंशच्च [ ] 19

मे॒ चत॑स्रश्च मे॒ ऽष्टौ च॑ मे॒ द्वाद॑श च मे॒
षोड॑श च मे विग्ंश॒तिश्च॑ मे॒ चतु॑र्विग्ंशतिश्च
मे॒ ऽष्टाविग्ं॑शतिश्च मे॒ द्वात्रिग्ं॑शच्च
मे॒ षट् -त्रिग्ं॑शच्च मे चत्वारि॒ग्ं॒शच्च॑ मे॒
चतु॑श्चत्वारिग्ंशच्च मे॒
ऽष्टाच॑त्वारिग्ंशच्च मे॒ वाज॑श्च प्रस॒वश्चा॑ -
पि॒जश्च॒ क्रतु॑श्च॒ सुव॑श्च मू॒र्धा च॒
व्यश्ञि॑यश्चा - -न्त्याय॒नश्चा - न्त्य॑श्च
भौव॒नश्च॒ भुव॑न॒श्चा -धि॑पतिश्च ॥ 20 ॥
(त्रय॑स्त्रिग्ंशच्च॒ – व्यश्ञि॑य॒ – एका॑दश च
) (अ. 11)

वाजो॑ न -स्स॒प्त प्र॒दिश॒श्चत॑स्रो वा परा॒वतः॑
। वाजो॑ नो॒ विश्वै᳚र्दे॒वै -र्धन॑सातावि॒हाव॑तु
॥ विश्वे॑ अ॒द्य म॒रुतो॒ विश्व॑ ऊ॒ती विश्वे॑
भवन्त्व॒ग्नय॒ -स्समि॑द्धाः । विश्वे॑ नो दे॒वा
अव॒सा -ऽऽ ग॑मन्तु॒ विश्व॑मस्तु॒ द्रवि॑णं॒ -
वाँजो॑ अ॒स्मे ॥ वाज॑स्य प्रस॒व -न्दे॑वा॒
रथै᳚र्याता हिर॒ण्ययैः᳚ । अ॒ग्निरिन्द्रो॒
बृह॒स्पति॑र्म॒रुत॒ -स्सोम॑पीतये ॥ वाजे॑वाजे
ऽवत वाजिनो नो॒ धने॑षु [नो॒ धने॑षु , वि॒प्रा॒
अ॒मृ॒ता॒ ऋ॒त॒ज्ञाः॒ ।] 21

विप्रा अमृता ऋतज्ञाः । अ॒स्य मद्ध्वः॑ पिबत
मा॒दय॑द्ध्व -न्तृ॒प्ता या॑त
प॒थिभि॑र्देव॒यानैः᳚ ॥ वाजः॑ पु॒रस्ता॑दु॒त
म॑द्ध्य॒तो नो॒ वाजो॑ दे॒वाग्ं ऋ॒तुभिः॑
कल्पयाति । वाज॑स्य॒ हि प्र॑स॒वो नन्न॑मीति॒
विश्वा॒ आशा॒ वाज॑पतिर्भवेयम् ॥ पयः॑ पृथि॒व्या -
म्पय॒ ओष॑धीषु॒ पयो॑ दि॒व्य॑न्तरि॑क्षे॒ पयो॑
धाम् । पय॑स्वतीः प्र॒दिश॑ -स्सन्तु॒ मह्य᳚म् ॥ स -
म्मा॑ सृजामि॒ पय॑सा घृ॒तेन॒ स -म्मा॑ सृजाम्य॒प [स
-म्मा॑ सृजाम्य॒पः , ओष॑धीभिः ।] 22

ओष॑धीभिः । सो॑ -ऽहं -वाँजग्ं॑ सनेयमग्ने ॥
नक्तो॒षासा॒ सम॑नसा॒ विरू॑पे धा॒पये॑ते॒
शिशु॒मेकग्ं॑ समी॒ची । द्यावा॒ क्षामा॑ रु॒क्मो
अ॒न्तर्वि भा॑ति दे॒वा अ॒ग्नि -न्धा॑रय -
न्द्रविणो॒दाः ॥ स॒मु॒द्रो॑ -ऽसि॒
नभ॑स्वाना॒र्द्रदा॑नु -श्श॒भूंर्म॑यो॒भूर॒भि
मा॑ वाहि॒ स्वाहा॑ मारु॒तो॑ -ऽसि म॒रुता᳚ -ङ्ग॒ण -
श्श॒भूंर्म॑यो॒भूर॒भि मा॑ वाहि॒ स्वाहा॑
ऽव॒स्युर॑सि॒ दुव॑स्वाञ्छ॒भूंर्म॑यो॒भूरभि मा॑
वाहि॒ स्वाहा᳚ ॥ 23 ॥
(धने᳚ – ष्व॒पो –
दुव॑स्वाञ्छ॒भूंर्म॑यो॒भूर॒भ मा॒ -द्वे च॑) (
अ. 12)

अ॒ग्निं -युँ॑नज्मि॒ शव॑सा घृ॒तेन॑ दि॒व्यग्ं
सु॑प॒र्णं -वँय॑सा बृ॒हन्त᳚म् । तेन॑ व॒य -म्प॑तेम
ब्र॒द्ध्नस्य॑ वि॒ष्टप॒ग्ं॒ सुवो॒ रुहा॑णा॒
अधि॒ नाक॑ उत्त॒मे ॥ इ॒मौ ते॑ प॒क्षाव॒जरौ॑
पत॒त्रिणो॒ याभ्या॒ग्ं॒ रक्षाग्॑ -स्यप॒हग्ग् -
स्य॑ग्ने । ताभ्या᳚ -म्पतेम सु॒कृता॑मु लो॒कं -
यँत्रर् ष॑यः प्रथम॒जा ये पु॑रा॒णाः ॥ चिद॑सि
समु॒द्रयो॑नि॒रिन्दु॒र्दक्ष॑ -श्श्ये॒न ऋ॒तावा᳚
। हिर॑ण्यपक्ष -श्शकु॒नो भु॑र॒ण्यु -र्म॒हान् -
थ्स॒धस्थे᳚ ध्रु॒व [ध्रु॒वः , आ निष॑त्तः ।] 24

आ निष॑त्तः ॥ नम॑स्ते अस्तु॒ मा मा॑
हिग्ंसी॒र्विश्व॑स्य मू॒र्धन्नधि॑ तिष्ठसि
श्रि॒तः । स॒मु॒द्रे ते॒ हृद॑य -म॒न्तरायु॒ -
र्द्यावा॑पृथि॒वी भुव॑ने॒ष्वर्पि॑ते ॥ उ॒द्नो
द॑त्तोद॒धि -म्भि॑न्त्त दि॒वः
प॒र्जन्या॑द॒न्तरि॑क्षा -त्पृथि॒व्यास्ततो॑ नो॒
वृष्ट्या॑वत । दि॒वो मू॒र्धा -ऽसि॑ पृथि॒व्या
नाभि॒रूर्ग॒पामोष॑धीनाम् । वि॒श्वायु॒ -श्शर्म॑
स॒प्रथा॒ नम॑स्प॒थे ॥ येनर् ष॑य॒स्तप॑सा स॒त्र - [
स॒त्रम् , आस॒तेन्धा॑ना] 25

-मास॒तेन्धा॑ना अ॒ग्निग्ं सुव॑रा॒भर॑न्तः ।
तस्मि॑न्न॒ह -न्नि द॑धे॒ नाके॑ अ॒ग्निमे॒तं -
यँमा॒हुर्मन॑व स्ती॒र्णब॑र् हिषम् ॥ त -
म्पत्नी॑भि॒रनु॑ गच्छेम देवाः
पु॒त्रैर्भ्रातृ॑भिरु॒त वा॒ हिर॑ण्यैः । नाक॑ -

ङ्गृह्णा॒ना -स्सु॑कृ॒तस्य॑ लो॒के तृ॒तीये॑
पृ॒ष्ठे अधि॑ रोच॒ने दि॒वः ॥ आ वा॒चो मद्ध्य॑ -मरुह
-द्भुर॒ण्युर॒य -म॒ग्नि -स्सत्प॑ति॒श्चेकि॑तानः ।
पृ॒ष्ठे पृ॑थि॒व्या निहि॑तो॒ दवि॑द्युत -दधस्प॒द -
ङ्कृ॑णुते॒ [-दधस्प॒द -ङ्कृ॑णुते , ये पृ॑त॒न्यवः॑ ।
] 26

ये पृ॑त॒न्यवः॑ ॥ अ॒यम॒ग्निर्वी॒रत॑मो वयो॒धा -
स्सं॑ह॒स्रियो॑ दीप्यता॒मप्र॑युच्छन्न् ।
वि॒भ्राज॑मान -स्सरि॒रस्य॒ मद्ध्य॒ उप॒ प्र यां॑त
दि॒व्यानि॒ धाम॑ ॥ स -म्प्र च्यं॑वद्ध्व॒मनु॒ स -
म्प्र या॒ताग्ने॑ प॒थो दे॑व॒याना᳚न्
कृणुद्ध्वम् । अ॒स्मिन् -थ्स॒धस्थे॒
अद्ध्युत्त॑रस्मि॒न् विश्वे॑ देवा॒ यज॑मानश्च
सीदत ॥ येना॑ स॒हस्र॒ -वँह॑सि॒ येना᳚ग्ने
सर्ववे॒दसम् । तेने॒मं -यँ॒ज्ञ -न्नो॑ वह
देव॒यानो॒ य [देव॒यानो॒ यः , उ॒त्त॒मः ।] 27

उ॑त्त॒मः ॥ उ -द्बु॑द्ध्यस्वाग्ने॒ प्रति॑
जागृह्येन मिष्टापू॒र्ते सग्ं सृं॑जेथाम॒य -ञ्च॑ ।
पुन॑ः कृ॒ण्वग्ग् स्त्वा॑ पि॒तर॒ -युँवा॑न -
म॒न्वाताग्ं॑सी॒ -त्त्वयि॒ तन्तु॑मे॒तम् ॥ अ॒य -
न्ते॒ योनि॑र् -ऋ॒त्वियो॒ यतो॑ जा॒तो अरो॑चथाः । त -
ञ्जा॒नन्न॑ग्न॒ आ रो॒हाथा॑ नो वर्धया र॒यिम् ॥ 28 ॥
(ध्रु॒वः – स॒त्रं – कृ॑णुते॒ – यः –
स॒प्तत्रिग्ं॑शच्च) (अ . 13)

ममा᳚ग्ने॒ वर्चो॑ विह॒वेष्व॑स्तु व॒य -
न्त्वेन्धा॑ना स्त॒नुव॑ -म्पुषेम । मह्य॑ -
न्नमन्ता -म्प्र॒दिश॒श्चत॑स्र॒ स्त्वया -
ऽद्ध्य॑क्षेण॒ पृत॑ना जयेम ॥ मम॑ दे॒वा वि॑ह॒वे
सं॑न्तु॒ सर्व॒ इन्द्रा॑वन्तो म॒रुतो॒
विष्णु॑र॒ग्निः । मम॒ान्तरि॑क्ष मु॒रु
गो॒पम॑स्तु॒ मह्यं॒ -वाँतः॑ पवता॒ -ङ्कामे॑
अ॒स्मिन्न् ॥ मयि॑ दे॒वा द्रवि॑ण॒ माय॑जन्ता॒ -
म्मय्या॒ शीर॑स्तु॒ मयि॑ दे॒वहू॑तिः । दैव्या॒
होता॑रा वनिषन्त॒ [वनिषन्त , पूर्वे ऽरि॑ष्टा -
स्स्याम] 29

पूर्वे ऽरि॑ष्टा -स्स्याम त॒नुवा॑ सु॒वीराः᳚ ॥
मह्य॑ -यँजन्तु॒ मम॒ यानि॑ ह॒व्या -ऽऽकू॑ति -

स्स॒त्या मन॑सो मे अस्तु । एनो॒ मानिगा᳚ -
ङ्कत॒मच्च॒नाहं -विँश्वे॑ देवासो॒ अधि॑वोच ता मे
॥ देवी᳚ -ष्षडुर्वीरु॒रुणः॑ कृणोत॒ विश्वे॑ देवा
स इ॒ह वी॑रयद्ध्वम् । माहा᳚स्महि प्र॒जया॒ मा
त॒नूभि॒र्मा र॑धाम द्विष॒ते सो॑म राजन्न् ॥
अ॒ग्निर्म॒न्यु -म्प्र॑तिनु॒द -न्पु॒रस्ता॒ - [
प्र॑तिनु॒द -न्पु॒रस्ता᳚त् , अद॑ब्धो गो॒पाः] 30

-दद॑ब्धो गो॒पाः परि॑पाहि न॒स्त्वम् ।
प्र॒त्यञ्चो॑ यन्तु नि॒गुतः॒ पुन॒स्ते॑ ऽमैषा᳚ -
ञ्चि॒त्त -म्प्र॒बुधा॒ विने॑शत् ॥ धा॒ता धा॑तृ॒णा
-म्भुव॑नस्य॒ यस्पति॑ र्दे॒वग्ं स॑वि॒तार॑मभि
माति॒षाह᳚म् । इ॒मं -यँ॒ज्ञ म॒श्विनो॒भा
बृह॒स्पति॑ र्दे॒वाः पा᳚न्तु॒ यज॑मान -
न्न्य॒र्थात् ॥ उ॒रु॒व्यचा॑ नो महि॒ष -श्शर्म॑
यग्ं सद॒स्मिन् . हवे॑ पुरुहू॒तः पु॑रु॒क्षु । स
नः॑ प्र॒जायै॑ हर्यश्व मृड॒येन्द्र॒ मा [
मृड॒येन्द्र॒ मा, नो॒ री॒रि॒षो॒ मा परा॑ दाः ।] 31

नो॑ रीरिषो॒ मा परा॑ दाः ॥ ये न॑ -स्स॒पत्ना॒ अप॒ते
भ॑वन्त्विन्द्रा॒ -ग्निभ्या॒मव॑ बाधामहे॒ तान् ।
वस॑वो रु॒द्रा आ॑दि॒त्या उ॑परि॒ स्पृश॑ -म्मो॒ग्र
-ञ्चेत्ता॑रमधि रा॒जम॑क्रन्न् ॥ अ॒र्वाञ्च॒
मिन्द्र॑म॒मुतो॑ हवामहे॒ यो गो॒जि -द्ध॑न॒ -
जिद॑श्व॒ -जिद्यः । इ॒मन्नो॑ य॒ज्ञं -विँ॑ह॒वे
जु॑षस्वा॒स्य कु॑र्मो हरिवो मे॒दिन॑ -न्त्वा ॥ 32 ॥
(व॒नि॒ष॒न्त॒ – पु॒रस्ता॒न् – मा –
त्रिच॑त्वारिग्ंशच्च) (अ. 14)

अ॒ग्नेर्म॑न्वे प्रथ॒मस्य॒ प्रचे॑तसो॒ य -
म्पाञ्च॑जन्य -म्ब॒हव॑ -स्समि॒न्धते᳚ ।
विश्व॑स्यां -विँ॒शि प्र॑विविशि॒वाग्ं स॑मीमहे॒
स नो॑ मुञ्च॒त्वग्ं ह॑सः ॥ यस्ये॒द -
म्प्रा॒णन्नि॑मि॒ष -द्यदेज॑ति॒ यस्य॑ जा॒त -
ञ्जन॑मान -ञ्च॒ केव॑लम् । स्तौम्य॒ग्नि -
न्ना॑थि॒तो जो॑हवीमि॒ स नो॑ मुञ्च॒त्वग्ं ह॑सः ॥
इन्द्र॑स्य मन्ये प्रथ॒मस्य॒ प्रचे॑तसो
वृत्र॒घ्न -स्स्तोमा॒ उप॒ मामु॒पागुः॑ । यो
दा॒शुष॑ -स्सु॒कृतो॒ हव॒मुप॒ गन्ता॒ [गन्ता᳚ , स नो॑
मुञ्च॒त्वग्ं ह॑सः ।] 33

स नो॑ मुञ्च॒त्वग्ं ह॑सः ॥ य -स्स॑ङ्ग्रा॒म -
न्नय॑ति॒ सं -वँ॒शी यु॒धे यः पु॒ष्टानि॑
सग्ंसृ॒जति॑ त्र॒याणि॑ । स्तौमीन्द्र॑ -
न्नाथि॒तो जो॑हवीमि॒ स नो॑ मुञ्च॒त्वग्ं ह॑सः ॥
म॒न्वे वा᳚ -म्मित्रा वरुणा॒ तस्य॑ वित्त॒ग्ं॒
सत्यौ॑जसा दृग्ंहणा॒ य -न्नु॒देथे᳚ । या
राजा॑नग्ं स॒रथं॑ -याँ॒थ उ॑ग्रा॒ ता नो॑
मुञ्चत॒माग॑सः ॥ यो वा॒ग्ं॒ रथ॑ ऋ॒जुर॑श्मि -
स्स॒त्यध॑र्मा॒ मिथु॒ श्चर॑न्त -मुप॒याति॑
दू॒षयन्न्॑ । स्तौमि॑ [ ] 34

मि॒त्रावरु॑णा नाथि॒तो जो॑हवीमि॒ तौ नो॑
मुञ्चत॒माग॑सः ॥ वा॒यो -स्स॑वि॒तु र्वि॒दथा॑नि
मन्महे॒ यावा᳚त्म॒न्व -द्बि॑भृ॒तो यौ च॒ रक्ष॑तः
। यौ विश्व॑स्य परि॒भू ब॑भू॒वतु॒स्तौ नो॑
मुञ्चत॒माग॑सः ॥ उप॒ श्रेष्ठा॑न आ॒शिषो॑
दे॒वयो॒र्धर्मे॑ अस्थिरन्न् । स्तौमि॑ वा॒युग्ं
स॑वि॒तार॑ -न्नाथि॒तो जो॑हवीमि॒ तौ नो॑
मुञ्चत॒माग॑सः ॥ र॒थीत॑मौ रथी॒नाम॑ह्व ऊ॒तये॒
शुभ॒ -ङ्गमि॑ष्ठौ सु॒यमे॑भि॒रश्वैः᳚ । ययो᳚ - [
ययोः᳚ , वा॒ -न्दे॒वौ॒ दे॒वेष्व -नि॑शित॒ -] 35

-र्वा -न्देवौ दे॒वेष्व -नि॑शित॒ -मोज॒स्तौ नो॑
मुञ्चत॒माग॑सः ॥ यदया॑तं -वँह॒तुग्ं सू॒र्याया᳚ -
स्त्रिच॒क्रेण॑ स॒ग्ं॒ सद॑मि॒च्छमा॑नौ ।
स्तौमि॑ दे॒वा व॒श्विनौ॑ नाथि॒तो जो॑हवीमि॒ तौ
नो॑ मुञ्चत॒माग॑सः ॥ म॒रुता᳚ -म्मन्वे॒ अधि॑नो
ब्रुवन्तु॒ प्रेमां -वाँचं॒ -विँश्वा॑ मवन्तु॒
विश्वे᳚ । आ॒शून् . हु॑वे सु॒यमा॑नू॒तये॒ ते नो॑
मुञ्च॒न्त्वेन॑सः ॥ ति॒ग्ममायु॑धं -वीँडि॒तग्ं
सह॑स्व -द्दि॒व्यग्ं शर्धः॒ [शर्धः॑ , पृत॑नासु
जि॒ष्णु ।] 36

पृत॑नासु जि॒ष्णु । स्तौमि॑ दे॒वा -न्म॒रुतो॑
नाथि॒तो जो॑हवीमि॒ ते नो॑ मुञ्च॒न्त्वेन॑सः ॥
दे॒वाना᳚ -म्मन्वे॒ अधि॑ नो ब्रुवन्तु॒ प्रेमां -
वाँचं॒ -विँश्वा॑मवन्तु॒ विश्वे᳚ । आ॒शून् . हु॑वे
सु॒यमा॑नू॒तये॒ ते नो॑ मुञ्च॒न्त्वेन॑सः ॥ यदि॒द
-म्मा॑ -ऽभि॒शोच॑ति॒ पौरु॑षेयेण॒ दैव्ये॑न ।
स्तौमि॒ विश्वा᳚ -न्दे॒वा -न्ना॑थि॒तो जो॑हवीमि॒
ते नो॑ मुञ्च॒न्त्वेन॑सः ॥ अनु॑नो॒ -ऽद्यानु॑मति॒

र - [अनु॑नो॒ -ऽद्यानु॑मति॒ रनु॑ , इद॑नुमते॒] 37

-न्विद॑नुमते॒ त्वं वैँ ◌᳚श्वान॒रो न॑
ऊ॒त्यापृ॒ष्टो दि॒वि > 4 ॥ ये अप्र॑थेता॒ -
ममि॑तेभि॒ रोजो॑भि॒ र्ये प्र॑ति॒ष्ठे अभ॑वता॒ं -
वँसू॑नाम् । स्तौमि॒ द्यावा॑ पृथि॒वी ना॑थि॒तो
जो॑हवीमि॒ ते नो॑ मुञ्चत॒मग्ं॑ ह॑ंसः ॥ उर्वी॑
रोदसी॒ वरि॑वः कृणोत॒ -ङ्क्षेत्र॑स्य पत्नी॒ अधि॑
नो ब्रूयातम् । स्तौमि॒ द्यावा॑ पृथि॒वी ना॑थि॒तो
जो॑हवीमि॒ ते नो॑ मुञ्चत॒मग्ं॑ ह॑ंसः ॥ य -त्ते॑ व॒य -
म्पु॑रुष॒त्रा य॑वि॒ष्ठा वि॑द्वाग्ं॒सश्चकृ॒मा
कच्च॒ना - [कच्च॒न , आग॑ः ।] 38

-ऽऽग॑ः । कृ॒धी स्व॑स्मागं् अदि॑ते॒रना॑गा॒
व्येनाग्ं॑सि शिश्रथो॒ विष्व॑गग्ने ॥ यथा॑ ह॒ त -
द्व॑सवो गौ॒र्य॑ -ञ्चि -त्प॒दिषि॒ता ममु॑ञ्चता
यजत्राः । ए॒वा त्वम॒स्म -त्प्रमु॑ञ्चा॒
व्यग्ं॒हः प्राता ◌᳚र्यग्ने प्रत॒रान्न॒ आयु॑ः ॥ 39
॥
(गन्ता॑ – दू॒षय॒न् -थ्स्तौमि॒ – ययो॒ः – शर्धो॑ -ऽ –
नु॑मति॒रनु॑ – च॒न – चतु॑स्त्रिग्ं॒शच्च) (अ **. 15)**

(अ॒ग्नेर्म॑न्वे॒ – यस्ये॒द - मिन्द्र॑स्य॒ – य -स्स॑
-ङ्ग्रा॒ममिन्द्र॒ग्ं॒ – स नो॑ मुञ्च॒त्वग्ं॒ ह॑ंसः
। म॒न्वे वा॒न्ता नो॑ मुञ्चत॒मागं॑सः । यो वां ◌᳚ –
वा॒यो - रुप॑ – र॒थीत॑मौ॒ – यदया॑त -म॒श्विनौ॒ – तौ नो॑
मुञ्चत॒मागं॑सः । म॒रुता ◌᳚न् - ति॒ग्मं – म॒रुतो॑ –
दे॒वाना॒ं – यँदि॒दं -विँश्वा॒न् – ते नो॑
मुञ्च॒न्त्वेन॑सः । अनु॑ न॒ – उर्वी॒ –
द्यावा॑पृथि॒वी – ते नो॑ मुञ्चत॒मग्ं॒ह॑ंसो॒
यत्तै ◌᳚ । च॒तुरग्ं॒ ह॑ंस॒ -ष्षाडाग॑सश्च॒तुरेन॑सो॒
द्विरग्ं॒ह॑ंसः ।)

(अग्ना॑विष्णू॒ – ज्यैष्ठय॒ग्ं॒ – शञ्चो – क्र्वा –
ऽश्मा॑ चा॒ – ग्निश्चा॒ - ऽग्ं॒शु –
श्चे॒द्ध्मश्चा॒ -ऽग्निश्च॑ घ॒र्मा – गर्भा॒ –
श्चैका॑ च॒ – वाजो॑ नो – अ॒ग्निं -यु॑नज्मि॒ – ममा◌᳚ -
ऽग्ने – अ॒ग्नेर्म॑न्वे॒ – पञ्च॑दश ।)

(अग्ना॑विष्णू – अ॒ग्निश्च॒ – वाजो॑ नो॒ – अद॑ब्धो
गो॒पा – नव॑त्रिग्ं॒शत्)

(अग्ना॑विष्णू , प्रत॒रान्न॒ आयुं॑ः)

*(*युञ्जा॒नो – विष्णो॑ं - रपा॒गं॒ – र॒श्मि – र्नमो - ऽश्म॒ – अग्ना॑विष्णू – स॒प्त *) (7)*

॥ हरिंः ओम् ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहिताया - ञ्चतुर्थकाण्डे सप्तमः प्रश्न -स्समाप्तः ॥

Sri Amritananda Natha Guruvu Garu, Amrita Nilayam, Gowravaram Village & Post, Kavali Mandal, Nellore District, Andhra Pradesh.
Phone Number: +91 9493475515 | www.amritanilayam.org